# पितृभ्य :स्वधा

**प्रो. शम्भू कुमार झा**
प्रोफेसर एवं विभागाध्यक्ष
ज.रा.रा.सं. विश्वविद्यलय, जयपुर

'यस्य वाक्यं स ऋषि'[१] इति सर्वानुक्रमण्यां निगदितम्। ऋग्वेदे सूक्तानि मण्डलक्रमेण नियताक्षराणि छन्दोबद्धानि परिगीतानि। उक्तञ्च जैमिनिना 'यत्रार्थवशात् पादव्यवस्था सा ऋक्'[२] बृद्देवतायां 'सम्पूर्णमृषिवाक्यं तु सूक्तमित्यभिधीयते'[३] ऋग्वेदे दशमे मण्डले शाङ्खायनस्यर्षेः त्रिष्टुप्जगतीभ्यामुपनिबद्धं पितृगणदेवताकं पितृसूक्तं चतुर्दशमन्त्रात्मकं पितृमहिमप्रकाशकं आमुष्मिकपथप्रदर्शकं लोकालोकविचारकं पठ्यते।

पितृसूक्तस्य सम्बन्धः सामान्येन मृतात्मना साकं विभाति। पितृशब्दस्य प्रथमाबहुवचने पितरः' इति रूपं सिद्ध्यति। लोके पितर इति शब्देन मृतकस्यावबोधः प्रचलितः कथमिति प्रश्ने जाते कश्चिन्न्यायोऽत्र प्रवर्तते। 'रूढिर्योगाद् बलीयसी'[४] अयमत्र पितरः मृतकस्य परिजनस्य कृते रूढः, तस्मात् अयमेवार्थःसामाजिकैः स्वीकृतः। तर्हि अत्र प्रश्न उदेति तेन मृतात्मना सह वास्तव्यानामस्माकं कः सम्बन्धः शिष्यते शेषो वा। मृतः इति गतः तस्य त्यागः कर्त्तव्यः, तथैव च सामाजिकैः क्रियते। मृतकस्य शरीरं केनापि प्रयासेन स्थातुं न शक्यते, त्यागपक्ष एव साध्यः।

त्यागोऽपि शास्त्रेण विधिना विधेयः। शाास्त्रमत्र वदति 'कृमिविष्ठाभस्मरूपतः'[५] त्रिधावस्था शरीरस्य। भूमौ खननं क्रियते चेत् शरीरं कृमिमयं भवति वने वा जले वा प्रक्षिप्यते चेत् काकोलूकमत्स्यादिभिर्भक्षणेन विष्ठारूपं तच्छरीरं परिमणमते। अग्निदाहे सति भस्मरूपं च शरीरं प्रोक्तम्। भारते आश्रमाणां संप्रदायानां, वर्णानां बाहुल्ये मृतशरीरस्य संस्कारेऽपि भेदोऽवलोक्यते। भेदबाहुल्ये च निर्विवादरूपेण सम्पूर्णे जगति तच्छशरीरं त्याज्यमिति स्पष्टः सम्बन्धशब्दस्य व्युत्पत्तिलभ्योऽर्थः-सम्यक् बध्नातीति संबन्धः। वर्तमानानां वास्तव्यानां मानवानां भौतिकं शरीरं मातृपितृभ्यां सकाशात् लब्धमिति। कस्यापि शरीरं स्वयमेवोत्पन्नं न मन्यते कामं तस्य शरीरस्य जैविकः पिता माता च समाजात् भीतौ सन्तौ स्वकीयं नाम न ददतः। तद्यथा कुमारिकायाः

पुत्रं, विधवायाः वैधव्ये सन्तानलाभः समाजे अस्वीकृतः। अतः भयात् तस्य परित्यागः। तस्मात् भगवान् पाणिनिः सूत्रयामास–'कन्यायाःकनीन च'[६] व्यासः तथैव आसीत् श्रुतिर्वदति – 'आत्मा वै जायते पुत्रः'[७] अन्यच्च पतिर्जायां प्रविशति गर्भो भूत्वेह मातरम्। तस्यां पुनर्नवो भूत्वा दशमे मासि जायते।'[८] पुनश्च निरुक्ते –

'तज्जाया जाया भवति यदस्यां जायते पुनः'[९] अयं भावः पतिरेव गर्भं प्रविशति बिन्दुमाध्यमेन तथा पूर्णे गर्भे उत्पन्नो भवति स जातकः पितुः प्रतिकृतिः। तस्मात् विधिपूर्वकस्य जातस्य पितुर्धने स्वतोऽधिकारः अङ्गीकृतः। एषा धर्मशास्त्रीया व्यवस्था भारते प्रचलिता। अयं तावत् वास्तविकःशास्त्रीयः सामाजिकश्च सम्बन्धः मृतात्मना सह सन्ततेः। पितरोऽस्माकं पालकाः पारलौकिकाश्च। पितरः सदा सूत्रात्मना वंशस्थान् सर्वान् परिपालयन्ति। अस्माकं समेषां तैः पितृभिः सह नियतः संबन्धः। कदापि स न जहाति, अस्मान् बहुप्रयत्नेऽपि तस्य संबन्धस्य विच्छेदः असम्भवः।

इदानीं प्रकृतमनुसरामि–

**उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः।**

**असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु।।**[१०]

मन्त्रेऽस्मिन् पितृणां त्रिधा विभागः प्रदर्शितः। विद्यामधीत्यश्रौतकर्मानुष्ठानं च विधाय पितृत्वं प्राप्ताः उत्तमाः। सर्वं वेदे प्रतिष्ठितम्। श्रौतकर्मणामनुष्ठानं सदा विद्याग्नियोग्यतासंयोगसाहित्यात् संभवति। विद्या इत्युक्ते वेदाध्ययनमध्ययनविधिपूर्वकं, अग्निराधानविधिपूर्वकं योग्यता च अङ्गवैकल्यादिराहित्यम्। श्रौतकर्मानुष्ठानं श्रमसाध्यं ज्ञानसाध्यं द्रव्यसाध्यं च। श्रौतानुष्ठाने दम्पतीभ्यामेव प्रवेशः। एवं चास्मिन् कलिकाले श्रौतकर्म दुःसाध्यमभवत्। मध्यमाःपितरः स्मार्तकर्ममात्रतत्पराः तद्यथा वापीकूपतडागादीनां प्रतिष्ठातः। अधमाः सर्वथा संस्कारमलिनाः। एतेषां त्रयाणां कृते हविर्दानं मन्त्रे प्रतिपादितम्। एते त्रयः अस्माभिः प्रदत्तानि हवींषि प्राप्नुवन्तु। इमे अस्माकं कृते सौम्याः अनुग्रहकारकाःभवन्तु ये पितरः 'अवृकाः' वृकाः वनपशवःहिंसकाः। तद्रहिताः अवृकाः, ऋतज्ञाः, सत्यज्ञाः, यज्ञज्ञाः यज्ञे प्राणरक्षार्थं समागताः ते सर्वे अस्मानवन्तु रक्षन्तु।

उदीरताम् 'उत्तमं हविः प्राप्नुवन्तु'[११] इति सायणः। 'उत्तिष्ठन्तु'[१२] इति वेंकटः। अत्र पाश्चात्यानां किं मतं तदालोच्येत। अवरः, परासः, मध्यमाः – त्रिविधाः पितरः। अवरः निकृष्टाः। परासः उत्तमाः स्पष्टमन्यत्।

Let the lower the upper. the intermediate pitrs, rise up.[१३]

" May the soma loving fathers, the lowest the highest and the middle arise."[१४]

अवृकाः – Friendly[१५] Gentle[१६]

ऋतज्ञाः – Knowing right[१७]

ऋतज्ञाः – Righteousness[१८]

सोम्यासः – सोमसम्पादिनः[१९]

'They who deserve a share of soma'[२०] "soma loving"[२१]

उत्तमाः मध्यमाः अधमाश्चेति क्रमेण अन्तरिक्ष–स्वर्ग–पृथिवीलोकेषु वसन्ति। एतदतिरिक्तं अग्निष्वात्ताः, बर्हिषदः, सौम्याश्च पितरः श्रूयन्ते। ज्योतिषशास्त्रे पितृलोकविषये विवेचनं प्राप्यते – ' विधोरुर्ध्वभागे पितरो वसन्ति '[२२]

**द्वितीयो मन्त्रः –**

**इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः।**
**ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु।**[२३]

मन्त्रेऽत्र पूर्वाः पितरः उपराश्च पितरः ख्यातपूर्वाः ते सन्ति, ये यजमानात् जन्मतः प्रागेव पितृत्वं गताः पितामहादयः। उपराः पुनः बन्धुवर्गरूपाः ज्येष्ठाः कनिष्ठाश्च भ्रात्रा पितृत्वं प्राप्ताः। ये पृथिव्यामागत्य संस्थिताः ये चान्तरिक्षे कर्मनिष्ठाः अत्र उपनिष्ठाः प्रजाजनेषु आसीनाः सन्ति तेषां समेषां कृते नमस्कारवचनं व्याहरामि।

अस्मिन् लोके अस्माकं दायित्वं भवति यत् पितृदिने क्षयाहे तिथौ च श्राद्धादिकं विधेयम्। तद्दिने पितरः निश्चयं कव्यग्रहणार्थमागच्छन्ति। पुराणे च त्रिभिः पुत्रस्य पुत्रता निगदिता तद्यथा–

**जीविते वाक्यकरणात् क्षयाहे भूरिभोजनात्।**
**गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता।।**[२४]

**अथ तृतीयःमन्त्रः–**

आऽहं पितृन् सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः । बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः।[२५]

मन्त्रार्थकाले ऋषिर्वदति अहं पितृगणान् सम्यक् जानामि, भक्त्या आदरेण च ते आकृष्टाः भवन्ति इति ज्ञाने नास्ति संदेहः अहं इदमपि जानामि विष्णोः यत्क्रमणं त्रिषु लोकेषु भवति तत्सर्वं जानामि। तस्य परमात्मनः सम्पूर्णकार्याणामत्र गतिं चाहं वेद्मि। एतदतिरिक्तं चाहमिदं जानामि यत् ते पितरः श्राद्धादिकर्मसु कुशेषु आसीनाः सन्तः अन्नादिकं भुञ्जते सम्पूर्णं सोमाशं च लभन्ते। अहं यजमानः साक्षात् देवपित्रोः कर्म जानामि।

आ अवित्सि – आभिमुख्येन लब्धवानस्मि[२६]

स्वधा शब्दः – स्वधा वै पितृणामन्नम्[२७]

स्वधा – जलम्[२८]

“Self position self power sacrificial offering”[२९]

स्वधा – Funeral offering[३०] oblation[३१]

श्रद्धया भक्त्या च पितृगणस्य साक्षात् दर्शनं भवति स्म। इदानीमपि कर्तुं शक्यते।

**चतुर्थः मन्त्रः–**

**बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम्।**
**त आगताऽवसा शन्तमेनाथा नः शं यो ररपो दधात।**[३२]

बर्हिषदः पितरः इति सम्बोधनपदम्। ‘कौशं बर्हिः’[३३] बर्हिषि सीदन्तीति बर्हिषदः पितरः कुशासने उपविष्टाःयज्ञादौ। पुनश्च तैत्तिरीयब्रह्मणे – ‘यै वै यज्वानस्ते पितरो बर्हिषदः’[३४] सायणाचार्यस्य मते ‘यागं कृत्वा प्रेत्य पितृलोकं प्राप्ताः बर्हिषदः’[३५] हे पितरः अस्मान् नवीनान् यज्ञसंपादकान् यजमानान् रक्षन्तु। युष्मभ्यं हव्यं चकृमहे, अतःसर्वे बर्हिषदः एतानि हवींषि सेवध्वम्। ते हविर्जुष्टवन्तो यूयं शंतमेन सुखतमेन रक्षणेन अस्माकं समक्षमाध्यात। आगत्य च अस्मभ्यं शम् सुखं योः दुःखवियोगं अरपः निवापञ्च दत्त।

अत्रायं विशेषः पितरः दिवंगताः स्व–स्व कर्मानुसारं शरीरमवाप्नुवन्ति। हविर्ग्रहणाय ये यज्ञादौ संप्राप्ताः ते प्रायेण वायवीयरूपधराः सन्ति।

शं योः अरपः दधात इत्यस्य व्याख्यायां व्रजबिहारी चौबे महोदयेन न्यू वैदिक सेलेक्श्यान मध्ये लिखितं–

“bestow on us happiness, health and sinlessness”[३६]

पाश्चात्यानां चिन्तनमपि तथैव विभाति ‘‘शम् –Health योः–blessing अपरः–Free from hurt”[३७]

शं योः – Health and happiness-[३८]

अरपः दधात–पापरहितम् इति सायणः। Padron from Sian-[३९]

**पञ्चमो मन्त्रः–**

**उपहूता पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु।**
**त आगमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान्।।**[४०]

पितरः अनुग्रहसम्पन्नाः यज्ञीयद्रव्याणामुपयोगाय आहूताः सन्ति। यानि द्रव्याणि तेषां पितृणां कृते निधिवन्ति तृप्तिप्रदानि च भवन्ति। हविर्द्रव्याणां भोगार्थं सर्वे इह यज्ञे आगच्छेयुः अस्माकं स्तुतिं श्रुत्वा कल्याणं च कुर्युः। पितृकृपया सन्ततयः कुशासने श्राद्धादौ उपवेशनं कुर्वन्ति। पितृगणाः वंशस्थानां जनानां संरक्षणाय सर्वदा तत्पराः भवन्ति। वयं तान् न पश्यामः यतो हि ते दिव्यतेजोमयदेहधारिणः भवन्ति। यथा पादपानां संरक्षणं वयं कुर्मः। पादपानां इच्छा किमस्ति न जानीमो वयम्। परन्तु बहुभिरुपायैः जलादिप्रदानेन कण्टकादिभिराच्छादनेन तथा चौषधप्रदानेन रक्षामो वयम्, पादपाः अस्मान् जानन्ति न वा। अस्य तात्पर्यं भवति पादपेभ्यः अधिकं स्वामिनः नैजं सौख्यं, जीवनं च पादपेषु पश्यन्ति। पितरश्च वंशस्य विस्तारं तथैव वाञ्छन्ति उक्तञ्च गारुडे–

**ऐष्टव्याः बहवःपुत्राः यद्येकोऽपि गयां व्रजेत्।**[४१]
**गौरीं विवाहयेत् कन्यां नीलं वा वृषमुत्सृजेत्।।**

**षष्ठो मन्त्रः–**

**आच्या जानु दक्षिणतो निषद्येमं यज्ञमभिगृणीत विश्वे।**
**मा हिंसिष्ट पितरः केनचिन्नो यदव आगः पुरुषता कराम।।**[४२]

पितृकर्म सदा दक्षिणस्यां दिशि भवति तत्रापि अपसव्येन पितृकर्म इति शास्त्रसम्मतं वचः। प्राचीनावीती इत्युक्ते यज्ञोपवीतं दक्षिणस्कन्धे धार्यम् इति। सव्येन देवकार्यं। सव्यमिति वामस्कन्धे ब्रह्मसूत्रं भवेत्। उक्तञ्च शतपथब्राह्मणे – ''अथैनं पितरः प्राचीनावीतिनः सर्वजान्वाच्य''[४३] हे पितृगणाः यूयं सर्वे वामजानुं पातयित्वा दक्षिणाभिमुखाः सन्तः भूमौ उपविश्य क्रियमाणमिदं पितृकर्माभिष्टुत। अभिष्टवनेन सर्वे पितरः आनन्दमग्नाः भवन्ति। स्वभावतो वयं मनुष्याः अनृतभाषिणः मर्त्याः एतस्माद्धेतोः ज्ञानाज्ञानयोः अपराधं चक्रुः (कृतवन्तः) तथापि अस्मदीयभावेन मा हिंसिष्ट न अस्मान् वधिष्ट।

आगः – अपराधः। आगःशब्दे सान्तो नपुंसकलिंगः अपराधवचनः[४४] पुरुषता–पुरुषस्य भावःपुरुषता। ''तस्य भावस्त्वतलौ''[४५]। अल्पायुस्त्वात् अल्पकालनिवासत्वात् मनुष्यः मिथ्याभाषणं करोति – 'सत्यं देवाः अनृतं मनुष्याः'[४६]

**सप्तमो मन्त्रः –**

**आसीनारयसो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय।**
**पुत्रेभ्यः पितरस्तस्य वस्वः प्रयच्छत दहोर्जंदधात।।**[४७]

हे दिव्य ज्योतिषमद्भ्य देवभ्यः साकं यज्ञीयवेद्यामुविष्टाः पितृगणाः यूयं हविर्दत्तवते यजमानाय धनं दत्त। यजमानस्य संततिभ्यश्च धनं यच्छत। उपर्युक्तगुणयुताः यज्ञकर्मणि ऊर्जं धनं च प्रयच्छत।

अरुणीनामित्यत्र उव्वटाचार्यस्य भाष्यं द्रष्टव्यं भवति तद्यथा–

अरुणीनां अरुणवर्णानां अरुणवर्णास्ता ऊर्णाः भवन्ति याभिः कुतपाः क्रियन्ते। कुतपप्रियाश्च पितरः कुतपं चासने दद्यात्।[४८] कुतप इति सामान्ये लोके कञ्चुकी (कुर्ता) पदेन उच्यते, रयिशब्दः वस्वशब्दश्च उभावपि धनपर्यायौ।

**अष्टमो मन्त्रः –**

**ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः।**
**तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु।।**[४९]

ये अस्माकं सौम्यस्वभाववन्तः धनवन्तः आढ्याः पितरः वसिष्ठगोत्रोत्पन्नाः वस्त्रादिभिरलंकृतशरीराः देवेभ्यः पितृभ्यश्च सोमसम्पादनं चक्रुः ते प्राचीनाः पितरः सोमपानकाले ऊचुः अयं यमः पितृणामधिपतिः पितृभिःसाकं मैत्रीभावं कर्तुमभिलषति। पितृभिः साकं मैत्री सम्पाद्य यमः स्वेच्छया यथाभागं हविर्ग्रहणं करोतु। यथाकामं चहविः अत्तु।

मन्त्रे वसिष्ठ शब्दः विशिष्टार्थवाचकः। यद्यपि वेदे वसिष्ठनामक ऋषिः श्रूयते, परन्तु अत्र पितृणां विशेषणम्। वस् आच्छादने धातोः सकाशात् इष्ठन् प्रत्ययेन वसिष्ठः सिद्ध्यति। वसिष्ठस्य बहून्यपत्यानि। वसिष्ठः पुनर्वस्तृतमः कृतास्पदो वसति[५०] 'वसिष्ठाः वसिष्ठस्य गोत्रापत्यानि'[५१]

'As one of the group of ancient seers '[५२] अनूहिरे–देवान् प्रापितवन्तः। अनु वहन्ति स्म देवान् प्रापितवन्तः '[५३]

**नवमो मन्त्रः –**

**ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः।[५४]**
**आग्ने याहि सुविदत्रेभिरर्वाङ् सत्यैः कव्यैः पितृभिघर्मसद्भिः।।**

हे अग्ने क्रमेण प्रयत्नेन देवान् प्रति गन्तारः देवत्वं च प्राप्ताः स्तुतिभिः ये यज्ञान् सम्पादयन्ति तान् सर्वान् श्रेष्ठज्ञानसम्पन्नान् सत्यसत्यवक्तृन पितृन् कव्यप्रियान् अस्माकं सम्मुखमानय। अयं भावक्रमेण देवभावप्रापकः यज्ञविद्यां होत्रविद्यां च जानानः स्तुतिभिर्जनानां मनसि यज्ञानुष्ठानाय रुचेरुत्पादकः स्तोत्राणां सम्पादकः श्रेष्ठप्रज्ञानयुतःज्ञानेन सम्पन्नः पितृभिः साकं सम्मुखो भव।

जेहमाना – जेह प्रयत्ने गतौ च शानच् प्रत्ययः। क्रमेण देवत्वं प्राप्ताः इत्यर्थः।[५५]

होत्राविदः–यज्ञान् सम्यक् कर्तुं वेदितारः।[५६]

"Who know the sacrifice"[५७]

धर्मसद्भिः–यज्ञसादिभिःहविः।[५८]

Who dwell in glowing right[५९]

**दशमो मन्त्रः –**

**ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः सरथं दधानाः।**
**आग्ने याहि सहस्त्रं देववृन्दैः परैः पूर्वैः पितृभिर्घर्मसदिभ्ः।।[६०]**

असमर्थाः सत्यप्रतिपादकाः सत्यवक्तारः हविषो भक्षकाः हविषां रक्षकाः देवराजेनेन्द्रेण साकं अन्यैश्च देवैःसह रथारूढाः सन्तः गमनकर्तारः ये पितरः सन्ति, हे अग्ने, त्वं अपरिमिताभिः स्तुतिभिः प्राक्कालीनैः पूर्वजैः सह ये यजमानात् पूर्वमेवोत्पन्नाः पितृत्वं गताः ये च नूतनाः यजमानेन सह उत्पन्नाः अनन्तरं च जाताः किन्तु अल्पायुष्यात् दिवंगताः पितृत्वं च लब्धाः तैः सर्वैः पितृभिः सह सम्मुखो भव।

**एकादशो मन्त्रः –**

**अग्निष्वात्ताः पितर एह गच्छत सदः सदः सदत सुप्रणीतयः।**
**अत्ता हवींषि प्रचितानि बर्हिष्यथ रयिं सर्ववीरं दधातन।।[६१]**

अग्निष्वात्ताः पितरः एतन्नामधेयाः पितरः यूयं अस्मिन् पितृकर्मणि पितृयज्ञे आगच्छत आयात तथा आगत्य च यथोचिते स्थाने सादिते कुशासने सुखेन उपविशत। पितृणां सुखासनं कुश एव भवति। कुशेषु उपविशन्ति, कुशेषु स्थापितानि हवींषि च अत्त भक्षयत खादत। अनन्तरं यजमानाय धनं वीरसन्ततिञ्च प्रयच्छत।

अग्निष्वात्ताः – येषां श्मशानक्रिया सम्पन्ना। दाहभावं प्राप्ताः पितरः। अग्निना आस्वादिताः।[६२]

Whom Agni's flames have been tested whose body have been burnt.[६३]

**प्रयतानि – नियमपूर्वकं स्थापितानि**[६४]

**व्यपगतरागद्वेषमोहैरभिसंस्कृतानि शुचीनि**[६५]

**द्वादशो मन्त्रः –**

**त्वमग्न ईडितो जातवेदोऽवाढव्यानि सुरभीणि कृत्वी।**
**प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि**[६६]

अत्र मन्त्रे जातवेदः अग्नेः विशेषणं सम्बोधनपदम्।

जातमात्रः चः स्वप्रकाशेन अचिन्त्यैश्वर्येण च निखिलं जगत् वेदसे जातवेदाः तत्संबोधनेन जातवेदः हे अग्ने त्वं अस्माकं स्तुतिं मन्त्रपाठं च अंगीकृत्य अस्मदीयानि हवींषि सुरभीणि सुगन्धितानि सुवासितानि कृत्वा विधियुतं वहनं कृतवानसि तथा पितृभ्यः प्रदत्तवान् ते पितरश्च स्वधाकारेण प्रदत्तं हविः भक्षणं चक्रुः तस्मात् हेदेव त्वमपि अस्मत्प्रदतानि हवींषि भक्षय। अवाट् इत्यत्र वड् प्रापणे धातोः लङ्लकारे मध्यमपुरुषैकवचने छान्दसत्वात् रूपम्।

**त्रयोदशो मन्त्रः –**

**ये चेह पितरो ये च नेह यॉश्च विद्म याँश्च न प्रविद्म।**
**त्वं वेत्थ यदि ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व।**[६७]

अयं भावः पितृगणेषु केचन अस्माकं समीपे वसन्ति केचन दूरे वसन्ति। यान् पितृन् अहं विद्म जानामि समीपत्वात यान् च न जानामि विप्रकृष्टत्वात् अति दूरत्वात् तान् सर्वानपि हे अग्ने त्वं जानासि। अयमर्थः ये सूक्ष्मरूपधृताः सन्ति तान् वयं प्रयोगकर्तारो न जानीमः ये च स्थूलरूपधृताः तान् वयमनुष्ठातारो जानीमः परन्तु जातवेदसो विशेषणेन विशिष्टोऽयं भगवान् अग्निः सर्वान् दिव्यज्ञामयत्वात् जानाति तस्मात् हे अग्ने पितृयज्ञाख्यं

कर्म त्वं जुषस्व सेवस्व। अथवा ये अस्मद्वंशजाः पितामहेभ्यः प्राक्तनाः प्राचीनाः पितृत्वं प्राप्ताः उत वा गर्भस्रवादिभिः मृताः पितृत्वं च गताः तान् वयं न जानीमः, परन्तु अग्निः तथाविधान् सर्वान् जानाति। अतो हेतोः तेषां उपकाराय प्रीतये अस्मत्प्रदत्तं हविः सेवस्व।

**चतुर्दशःमन्त्रः –**

**ये अग्निदग्धा ये अनग्निदग्धा मध्येदिवं स्वधया मादयन्ते।**
**तेभिः स्त्राडसुनीतिमेतां यथावशं तन्वं कल्पयस्व।**

अयमर्थः ये पितरः अग्निना दग्धाः श्मशानक्रियासम्पन्नाः अस्माकं शरीरं प्राप्ताः ये च श्मशानक्रियाहीनाः भूमौ गर्ते सृताः अथवा महानद्यादौ प्रवाहिताः ये अग्निदाहेनाधिकृताः अथवा हिंसकप्राणिभिः भक्षिताः तथाविधाः उभयप्रकारकाः पितरः स्ववंशजैः प्रदत्तानि हवींषि भक्षणाय अन्तरिक्षे उपस्थिताः भवन्ति तथा च हवींषि स्वधाकारेण दत्तानि गृहीत्वा तृप्ताः आनन्दमग्नाश्च जायन्ते। हवींषि भुक्त्वा मोदन्ते सर्वे। हे अग्ने प्राणैः सह सूक्ष्मशरीराणां नेतारं यथाकामं कर्मानुसारं कर्मफलभोगाय स्वर्गतिं प्राप्तये कल्पयस्व समर्थयस्व। अयं भावः मृते सति अयं देदीप्यमानः अग्निदेवः मृतकस्य प्राणान् कार्मिकं शरीरं चादाय कर्मफलभोगाय सामर्थ्यमुत्पादयति। अस्मिन् जगति यावन्तः शरीरधारिणः सूक्ष्माः स्थूलाश्च दृश्यन्ते ते सर्वे नैजं कर्मफलं भुञ्जेरन्। कर्मणा शरीरस्य शोभनत्वं अशोभनत्वं चाकलितम्। कर्मणा धनाढ्यः निर्धनश्च। कर्मणा सकलाङ्ग विकलाङ्ग च जायते। किं बहुना अस्य संसारस्यापरं नाम कर्मक्षेत्रमस्ति विशिष्य भारतभूमिः कर्मभूरिति।[६९]

**असुनीतिः** – एतन्नामकः देवः अन्तरिक्षस्थाने निरुक्ते पठितः। असून् प्राणान् नीत्वा गच्छति।

तथा च गारुडे –

अग्निदग्धाश्च ये जीवाः येऽप्यदग्धा कुले मम। ते पिबन्तु मया दत्तं वस्त्रनिष्पीडितोदकम्।।[७०]

पितृणामुत्पत्तिविषये सामान्येन जिज्ञासा भवति वयं जानीमः अस्मद्वंशजाः दिवंगताः एव पितरो भवन्ति। परन्तु धर्मशास्त्रेऽस्य रहस्यमुद्घाटितम्। मनुस्मृतौ प्रथमेऽध्याये प्रोक्तम्–

**यक्षरक्षःपिशाचाँश्च गन्धर्वाऽप्सरसोऽसुरान्।**
**नागान् सर्पान् सुपर्णांश्च पितृणाञ्च पृथग्गणान्।।**

तत्रैव तृतीयाध्याये मनोः ये मरीच्यादयः पुत्राः प्रोक्ताः, तेषां पुत्राः पितर' इति समाख्याताः यथा–

**मनोर्हैरण्यगर्भस्य ये मरीच्यादयः सुताः।**
**तेषामृषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः।।**[७२]

अनन्तरं केषां के पितरः सन्ति सर्वमिदं विस्तेरण प्रपञ्चितम्–

**विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः।**
**अग्ष्विात्ताश्च देवानां मारीचा लोकविश्रुताः।।**

**दैत्यदानवयक्षाणां गन्धर्वोरगरक्षसाम्।**
**सुपर्णकिन्नराणाञ्च स्मृता बर्हिषदोऽत्रिजाः।।**

**सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः।**
**वैश्यानामाज्यपा नाम शूद्राणाञ्च सुकालिनः।।**

**सोमपास्तु कवेः पुत्राः हविष्मन्तोऽङ्गिरः सुताः।**
**पुलस्त्यस्याज्यपाः पुत्रा वसिष्ठस्य सुकालिनः।।**

**अग्निदग्धानग्निदग्धा काव्यान् बर्हिषदस्तथा।**
**अग्निष्वात्ताँश्च सौम्याँश्च विप्राणामेव निर्दिशेत्।।**[७३]

इदानीं प्रश्न उदेति कथं इमे तृप्ताः जायन्ते, क उपायः करणीयः। केषाञ्चित् आहुतिभिः अपरेषां स्तुतिभिः अन्ये पिण्डदानेन केचन ब्राह्मणभोजनेन, उक्तञ्च–

**अग्निष्वात्ता हुतैस्तृप्ताः सोमपाः स्तुतिभिस्तथा।**
**पिण्डैर्बर्हिषदः प्रीताः प्रेतास्तु द्विजभोजने।।**

**ऋषिभ्यः पितरो जाताः पितृभ्यो देवमानवाः।**
**देवभ्यस्तु जगत्सर्वं चरं स्थाण्वनुपूर्वशः।।**[७४]

अस्य शोधालेखस्य सारः वर्तते पितृकर्म सर्वैः निश्चितमनुष्ठेयम्। यतो हि वयं पितृभ्य उत्पन्नाः पारिमताश्च। देवकार्यं समाप्य पितृकर्म पुनश्च देवकार्यं साधयेत् यथा चाह –

**देवकार्याद् द्विजातीनां पितृकार्यं विशिष्यते।**
**दैवं हि पितृकार्यस्य पूर्वमाप्यायनं स्मृतम्।।**[७५]

स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः । ॐ विष्णवे नमः । ॐ विष्णवे नमः । ॐ विष्णवे नमः ।

श्रौतसाधकाय अमावास्यायामेव पिण्डपितृयज्ञःविधीयते । सोमो राजा यः नभसि दृश्यते स देवानामन्नम् उक्त च 'यमादित्या अंशुमाप्याययन्ति'[७६] तथा अमायां रात्रौ स राजमानश्चन्द्रः क्षीयते, अतः क्षीणे काले पितृभ्यो द्रव्यं दद्यात् अनेन क्रमेण पितृभ्यो देवैः साकं कलहस्य निवारणं भवति उक्तञ्च शतपथे–

तस्मिन्क्षीणे ददाति तथेभ्यौऽसमदं करोत्यथ यदक्षीणे दद्यात् समदं ह कुर्यात्[७७]

तत्रैव पूर्वाह्ण – मध्याह्ण – अपराह्णेषु कः कालः कस्य कृते प्रशस्तः इति मीमांसितः–

''स वा अपराह्णे ददाति। पूर्वाह्णे वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितृणां तस्मादपराह्णे ददाति।''[७८] पिण्डदानानन्तरं ''अत्र पितरो मादयध्वं इति मन्त्रं जपति। अनन्तरं पराङ्मुखः सन् पिण्डाभिमुख्यं विहाय पर्यावर्तेत। यथा कर्ता एकस्य मुहूर्तस्य कृते पिण्डं न पश्येत् यतो हि पितरः मनुष्येभ्यः तिरोभूताः अन्तर्धानशक्तियोगात्। अतः पितृणां तिरोधानेन भवितव्यम्। यथा चाह शातपथी श्रुतिः ''अथ पराङ् पर्यावर्तते। तिर इव वै पितरो मनुष्यभ्यः तिर इवैतद् भवति स वा आत्तमितोरासीदित्याहुरेतावान् चासुरिति स वै मुहूर्तमेवासित्वा।।[७९]

१ षड्गुरुशिष्य सर्वानुक्रमणी
२ मीमांसासूत्रम्
३ बृहद्देवता
४ कर्कभाष्यम्
५ गरुडपुराणाम्
६ पाणिनीयाष्टाध्यायी
७ निरुक्तम्
८ निरुक्तम्
९ निरुक्तम्
१० ऋग्वेदसंहिता–१०.१५.०१
११ सायणभाष्यम
१२ वेंकटभाष्यम्
१३ Mison
१४ Maxmuller
१५ Meedonell
१६ Griffith
१७ Meedonell
१८ Griffith
१९ वेंकटमाधवः
२० Mecdonell
२१ Maxmuller
२२ ज्योतिषशास्त्रम्
२३ ऋग्वेद–१०.१५.२
२४ गरुडपुराणाम्

२५ ऋग्वेद-१०.१५.३
२६ वेंकटमाधवटीकायाम्
२७ शतपथब्राह्मणम्
२८ निघण्टौ
२९ मोनियर विलियम
३० Machdonell
३१ Griffith
३२ ऋग्वेद-१०.१५.४
३३ कात्यायन श्रौतिसूत्रम्
३४ तैत्तिरीयब्राह्मणम् - १.६.९
३५ सायणभाष्यम्
३६ New Vedic Selection Part II
३७ Macdonell
३८ Wilson
३९ Wilson
४० ऋग्वेद - १०.१५.५
४१ गरुडपुराणम् प्रेतखण्डः
४२ ऋग्वेद - १०.१५.६
४३ शत. ब्रा. - २.४.२.२
४४. उव्वटाचार्यः
४५. अष्टाध्यायी
४६ शत. ब्रा.
४७ ऋग्वेद - १०.१५.७
४८ शुक्लयजुर्वेद महीधर-१९/६३
४९ ऋग्वेद - १०.१५.८
५० शुक्लयजुर्वेदभाष्ये - उव्वटः
५१ शुक्लयजुर्वेदभाष्ये-महीघरः
५२ Macdonell
५३ शुक्लयजुर्वेदभाष्ये - महीघरः
५४ ऋग्वेद - १०.१५.९
५५ सायणाचार्यः
५६ सायणाचार्यः तत्रैव भाष्ये
५७ Maxmuller
५८ सायणः तत्रैव
५९ Griffith
६० ऋग्वेदः - १०.१५.५०
६१ तत्रैव - १०.१५.११
६२ शु.यजु. १९/६० महीधरः
६३ Griffith
६४ महीधर यजुर्वेदः
६५ उव्वटः यजुर्वेद
६६ ऋग्वेद - १०.१५.१२
६७ ऋग्वेदः - तत्रैव १३
६८ ऋग्वेदः तत्रैव - १०.१५.१४
६९ निरुक्तम् दैवतकाण्डम्
७० गरुडपुराणम् प्रेतखण्डः
७१ मनुस्मृतिः-१.३७
७२ मनुस्मृतिः-३.१९४
७३ मनुस्मृतिः-तत्रैव
७४ मनुस्मृति कुल्लूकभट्टस्य टीका तृतीयेऽध्याये
७५ मनुस्मृतिः-३.३०३
७६ तै.सं. २.४.१४.२
७७ शत.ब्रा. २.३.४.७
७८ तत्रैव
७९ शत ब्रा. २.३.४.२१